# kavikaNThAbharaNam by Shrikrishnakavi

# કવિકણ્ઠાભરણમ્

## Document Information

Text title : kavikaNThAbharaNam by Krishnakavi

File name : kavikaNThAbharaNam.itx

Category : misc

Location : doc_z_misc_misc

Author : Krishnakavi

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : from Malayamaruta 3 page 86-88

Latest update : August 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# કવિકણ્ઠાભરણમ્

વલ્મીકજન્મનિ મુનૌ કૃતસન્નિધા (ના)
જિહ્વાઙ્ગણાત્ સમવતીર્ય પુરા વિધાતુઃ ।
અગ્રાસનં કવિષુ યા વિતતાર તસ્મૈ
સા ભારતી વિજયતાં સુચિરં ધરણ્યામ્ ॥ ૧॥

નો કાલિદાસપદવીમનુધાવતીયં
વાણી મમેતિ કવિતાં ન પરિત્યજામિ ।
નાસૌ પુરન્દરપુરીગણિકોપમેતિ
કો વા જહાતિ દયિતાં પરિણીય લોકે ॥ ૨॥

કર્ણામૃતત્વમુપયાતિ નિશમ્યમાના
વાણીવ યા મૃગદૃશામનુભૂયમાના ।
તૃષ્ણાં ચ વર્ધયતિ વક્ત્રસુધેવ તાસાં
તામામવ(ન)ન્તિ કવિતાં રસિકાવતંસાઃ ॥ ૩॥

કાઠિન્યજન્મસદનં ન સદા શિલેવ
તૂસ્ય રાશિરિવ નાપિ સુખેન ભેદ્યા ।
અન્તર્નિગુમ્ભિતરસા કઠિનાપિ મૃદ્વી
યા કામિનીસ્તનતટીવ હિ સૈવ વાણી ॥ ૪॥

કાન્તા યથા હૃદયહારિણમેવ કાન્તં
વાણી સ્વયં કવયિતારમસૌ વૃણીતે ।
કૃષ્ટા બલાદ્યદિ ભવેન્ન કદાપિ તેન
ભુઙ્ક્તેઽખિલાનપિ યથારસમાત્મભોગાન્ ॥ ૫॥

દુઃખાનિ ચાપ્તતમબન્ધુવિયોગજાનિ
વાક્યૈઃ સુધારસમયૈઃ પરિમાર્ષ્ટિ કાન્તા ।
તસ્યા વિયોગજનિતાનિ (ચ) દુઃસહાનિ
દૂરીકરોતુ નિતરાં કવિતાવધૂટી૧॥ ૬॥

મન્દાનિલેન શિશિરેણ હિ વીજ્યમાના
બાલારુણસ્ય કિરણૈઃ પરિચુમ્બ્યમાના ।
વાણી પતત્રિનિચયૈરપિ ગીયમાના
ડોલાવિહારમયતે હૃદયે કવીનામ્ ॥ ૭॥

જિહ્વાઙ્ગણેષ્વનૃતમેવ સદા કવીનાં
નૃત્યં સમાકલયતીતિ હિ યે ભણન્તિ
કુર્વન્તુ તે નનુ નિજામચિરેણ જિહ્વાં
જહ્નૂદ્ભવાસલિલસઙ્ગમતઃ પવિત્રામ્ ॥ ૮॥

ગીતેન મઞ્જુમુરલીમુખસમ્ભવેન
ચિત્રેણ ભાવપરિગુમ્ભનબન્ધુરેણ ।
માધ્વીરસેન કવનેન ચ દીયમાન-
માનન્દસારમવગચ્છતિ તદ્રસજ્ઞઃ ॥ ૯॥

યે કેચિદર્થગુરુતામવિચિન્ત્ય વાચાં
પ્રાસૈકદત્તધિષણાઃ કવયો લિખન્તિ ।
તેષાં કૃતી રસિકરઞ્જકતાં ન યાતિ
ભૂષાઞ્ચિતા વિવસના હરિણેક્ષણેવ ॥ ૧૦॥

સ્યાત્સન્તતં કવયિતુર્યદિ સિચ્યમાના
વાણી રસૈરઘરિતામરલોકપાનૈઃ ।
પ્રાસૈર્વિનાપિ હૃદયઙ્ગમતામુપૈતિ
નારોપિતં ગુણમભીત્સતિ રમ્યતા હિ ॥ ૧૧॥

આરામમન્દમરુતાભિગતશ્ચ સૌધઃ
પૂર્ણેન શીતરુચિના રુચિરા ત્રિયામા ।
માધુર્યગર્ભકવિતા રસિકા ચ કાન્તા
યેષાં ભવન્તિ પુરુષા નનુ તે હિ ધન્યાઃ ॥ ૧૨॥

યે કેચિદત્ર કવયઃ શતશઃ પદાનાં
વિચ્છેદનેન પરિતોષમવાપ્નુવન્તિ ।
એતે સરસ્વતિ સરોરુહકોમલાનિ
કૃન્તન્તિ નિષ્કરુણમેવ તવાઙ્ગકાનિ ॥ ૧૩॥

કા ત્વં મૃગાક્ષિ, વચસામધિદેવતાહં

માતશ્ચિરાય રુદતી નનુ કુત્ર યાસિ ।
ભોજાદિમાશ્રયલયાત્ દિવમુત્પતામિ
મામૈવમમ્બ, કથમત્ર હિ માદૃશાનામ્ ॥ ૧૪॥

બાલેન ભારતિ મયા મિતદૃષ્ટિનાપિ
પાદામ્બુજે તવ મદ સમર્પિતૈષા ।
કારુણ્યવારિનિધિવીચિભિરાહતા તે
જીયાચ્ચિરં જગતિ મે કવિકણ્ઠભૂષા ॥ ૧૫॥

॥ ઇતિ કૃષ્ણકવિવિરચિતં કવિકણ્ઠાભરણં સમાપ્તમ્ ॥

Encoded and proofread by Sunder Hattangadi

*kavikaNThAbharaNam by Shrikrishnakavi*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*